# श्रीश्रीकृष्णप्रेमिमहाप्रभुविरचितमानुग्रहपत्रम्



स्वयम्प्रमाणभूतस्य वेदस्य साक्षान्नारायणत्वं सिद्धम्। 'वेदो नारायाणः साक्षात् स्वयंभूरिति शुश्रुम' इति वचनात्। अदृष्टविषयस्य शाब्दप्रमाणगम्यत्वमेव। धर्मस्यादृष्टविषयत्वात् शास्त्रैकवेद्यत्वं 'तस्माच्छास्त्रं प्रमाणं ते' इति भगवद्वचनात्। ब्रह्मणोपि शास्त्रयोनित्वं वेदव्यासनिर्णीतम्। 'परोक्षवादा ऋषयः परोक्षं मम च प्रियम्' इति भगवद्वचनाद्देवाः परोक्षप्रियाः प्रत्यक्षद्विषश्च। परोक्षप्रिया एव हि देवाः। वेदानामपि परोक्षवादित्वं 'परोक्षवादो वेदोयं बालानामनुशासनम्' इति स्मृतेः। तस्माद्वेदार्थनिर्धारणमशक्यम्॥

शब्दानां यथार्थनिरूपणं रूढिः, ध्वनेर्निरूपणं प्रकरणात्। निषिद्धभोजनं कर्तुकामं पुत्रं निषेधयति कोपेन पिता, एवं चेद्विषं भक्षयेति। अत्र निषिद्धभोजनस्य निषेध एवार्थो ध्वन्यते। अपह्नव इत्यलङ्कारो विद्यते काव्येषु। ध्वन्यालोक इति प्रबन्धः प्रसिद्धः। तस्मादेव वाक्यानां रूढार्थवत्वं ध्वन्यर्थवत्वमिति द्विविधत्वं दृश्यते। यज्ञस्य विष्णुत्वं कर्मत्वमपि ग्राह्यम्। प्रकरणादर्थज्ञानं प्रकाशते। 'द्वा सुपर्णा सयुजा सखाया' (ऋग्वेदः, १.१६४.२०.) इति वाक्योक्तसुपर्णद्वयस्य पक्षिद्वयमेव वाच्यम्। तत्पक्षिद्वयस्य जीवेश्वरत्वमेव ग्राह्यम्। एवमध्यात्मज्ञानेन मोक्षसिद्धिः॥

एवं वेदवाक्यानामध्यात्मज्ञानपरमेवार्थं गृहीत्वा मोक्षमाप्नुयादिन्द्रप्राणाधिकरणन्यायेन। मन्त्राणां कर्मशेषत्वमेव मन्यन्ते मीमांसकाः। कर्मशेषत्वे प्राप्ते मन्त्रार्थानां गौणत्वम्।

मन्त्राणामाध्यात्मिकपरत्वमुपेक्षितम्। 'विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु' इत्यस्य मन्त्रस्य कर्मशेषत्वं प्रयुक्तम्। विष्णुशब्दस्य कर्तृत्वं योनिशब्दस्य योनित्वं युक्तम्। किन्तु आध्यात्मिकपरत्वेन विष्णुशब्दस्य परमात्मेत्यर्थः। योनिशब्दस्य उपादानकारणत्वं सिद्ध्यति। जगद्रूपस्य उपादानकारणभूतां प्रकृतिमुपादाय जगत्कर्ता विष्णुर्निमित्तभूतः सृजतीत्यर्थः। त्वष्टा रूपाणि पिंशत्विति सहकारित्वम्। एवं तत्ववादिनां जगत्सृष्टिविचारेण जगत्कारणभूतपरमात्मपर एवार्थो ग्राह्यते। तस्मादस्यां व्याख्यायामध्यात्मपरमेवार्थः आख्यातः। विष्णुर्व्यापनशीलः परमात्मा। योनिं मूलं कल्पयतु रचयतु। अस्यार्थस्याध्यात्मपरत्वादेवमुक्तं रङ्गनाथेन। एवमेव मन्त्राणां कर्मशेषत्वं त्यक्त्वाध्यात्मपरत्वमेव प्रदर्शितम्। अर्थज्ञानेन प्रयोगो न बाध्यते विहितत्वात्। विशिष्टफलवत्वमेव वक्तव्यम्। ध्वनिदीपिकाप्रकाशस्य अस्मदभियुक्तस्य श्रीरङ्गनाथस्य वैदिकपरम्पराजातत्वादेव वेदार्थविचारोत्साहः अजायतेति मन्ये। अयं विचारः सफलो भवतु। विद्वांसः परिशोधयन्तु।

- श्रीकृष्णप्रेमी